यति तापयति दाहयति कुष्णाति मांसानि प्रगालयति कुष्ठानि विषं वर्द्धयति शोफान् स्फोटयति दन्तान् च्यावयति पुंस्त्वमुपहन्ति इन्द्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयति च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्च्चिकेन्द्रलुप्तप्रभृतीन् विकारानुपजनयति।"
"प्रलीयन् क्लेदविष्यन्दलाघवं कुरुते मुखे।
यः शीघ्रं लवणो ज्ञेयः सविदाहमुखस्य च॥"
इति चरके सूत्रस्थाने २६ अध्यायः॥
"लवणः संशोधनः पाचनो विश्लेषणः क्लेदनः शैथिल्यकृदुष्णः सर्व्वरसप्रत्यनीको मार्गविशोधनः सर्व्वशरीरावयवमार्द्दवकरश्चेति स एवं-गुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा-सुखाक्षिपाकं रक्तपित्तवातशोणिताम्लीकाप्रभृतीनापादयति॥"
"यो भक्तरुचिमुत्पादयति कफप्रसेकं जनयति मार्द्दवञ्चापादयति स लवणः।" इति सुश्रुते सूत्रस्थाने ४२ अध्यायः॥ * ॥)
लवणासुरस्य विवरणं यथा,—
"पूर्व्वं कृतयुगे राजन्! दैतेयः सुमहामतिः।
लोलापुत्त्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः॥
स मधुर्व्वीर्य्यसम्पन्नो धर्म्मे च सुसमाहितः।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः॥
शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम्।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह॥
यावत् सुरैश्च विप्रैश्च न विरुध्येर्म्महासुर!।
तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति॥
यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः।
तं शूलो भस्मसात् कृत्वा पुनरेष्यति ते करम्॥
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम्।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि॥
तं ब्रुवाणं मधुं देवः सर्व्वभूतपतिः शिवः।
प्रत्युवाच महादेवो नैतदेवं भविष्यसि॥
माभूत्ते विफला वाणी मत्प्रसादकृता शुभा।
भवतः पुत्त्रमेकन्तु शूलमेतद्भविष्यति॥
यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते।
अवध्यः सर्व्वभूतानां शूलहस्तो भविष्यति॥
एवं मधुर्व्वरं लब्ध्वा देवात् सुमहदद्भुतम्।
भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा॥
तस्याः पुत्त्रो महावीर्य्यो लवणो नाम दारुणः।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत्॥
तं पुत्त्रं दुर्व्विनीतन्तु दृष्ट्वा क्रोधसमन्वितः।
मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत्॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम्।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा।
सन्तापयति लोकांस्त्रीन् विशेषेण च तापसान्॥
आहारः सर्व्वसत्त्वानि विशेषेण च तापसाः।
आचारो रौद्रता नित्यं वासो मधुवने तथा॥
हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान्।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम्॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन्।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम्॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम्।
स भ्रातॄन् सहितान् सर्व्वानुवाच रघुनन्दनः॥
को हन्ता लवणं वीरः कस्यांशः स विधीयताम्।
भरतस्य महाबाहो शत्रुघ्नस्य च धीमतः॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत्।
अहमेनं वधिष्यामि ममांशः स विधीयताम्॥
भरतस्य वचः श्रुत्वा धैर्य्यशौर्य्यसमन्वितम्।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम्॥
शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम्।
कृतकर्म्मा महाबाहुर्मध्यमो रघुनन्दन!॥
आर्य्येण हि पुरा शून्या त्वयोध्या परिपालिता।
सन्तापं हृदये कृत्वा आर्य्यस्यागमनं प्रति।
प्रेष्ये मयि स्थिते राजन् भूयः क्लेशमाप्नुयात्॥
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत्।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम्॥
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम्।
राज्यं प्रशाधि धर्म्मेण वाक्यं मे यद्यवेक्षसे॥
यदा तु युद्धमाकाङ्क्षन् यदि कश्चित् समाह्वयेत्।
तदा शूलं गृहीत्वा तु भस्म रक्षः करोति हि॥
स त्वं पुरुषशार्द्दूल! तमायुधविनाकृतम्।
अप्रविष्टं पुरं पूर्व्वं द्वारि तिष्ठ धृतायुधः।
अभ्यर्थ्या क्रियमाणे तु अवध्यः स भविष्यति॥
ततः प्रभाते विमले तस्मिन् काले स राक्षसः।
निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः॥
एतस्मिन्नन्तरे वीर उत्तीर्य्य यमुनां नदीम्।
तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत॥
ततोऽर्द्धदिवसे प्राप्ते क्रूरकर्म्मा स राक्षसः।
आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन्॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम्।
तमुवाच ततो रक्षः किमनेन करिष्यसि॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः।
शत्रुघ्नो वीर्य्यसम्पन्नो रोषादश्रूण्यवासृजत्॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम्।
योद्धुमिच्छामि दुर्ब्बुद्धे द्वन्द्वयुद्धं त्वया सह॥
तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्॥
आहूतस्तु पुनस्तेन शत्रुघ्नेन महात्मना।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः॥
आकर्णात् स विकृष्याथ तद्धनुर्धन्विनां वरः।
स मुमोच महावाणं लवणस्य महोरसि॥
उरस्तस्य विदार्य्याशु प्रविवेश रसातलम्।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम्॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः।
पपात सहसा भूमौ वज्राहत इवाचलः॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे।
पश्यतां सर्व्वदेवानां रुद्रस्य वशमन्वगात्॥
हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः।
ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम्॥
वरदास्तु महाबाहो सर्व्व एव समागताः।
विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः॥
देवानां भाषितं श्रुत्वा शूरो मूर्द्ध्नि कृताञ्जलिः।
प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान्॥
इयं मधुपुरी रम्या मधुरा देवनिर्म्मिता।
निवेशं प्राप्नुयाच्छीघ्रमेव मेऽस्तु वरः परः॥
तं देवाः प्रीतमनसो बाढ़मित्येव राघवम्।
भविष्यति पुरी रम्या शूरसेना न संशयः॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा।
शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयेत्॥
सा सेना शीघ्रमागच्छत् श्रुत्वा शत्रुघ्नशासनम्।
निवेशनञ्च शत्रुघ्नः श्रावणेन समारभत्॥
तां पुरीं दिव्यसङ्काशां नानापण्योपशोभिताम्।
निरीक्ष्य परमप्रीतः परं हर्षमुपागमत्॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम्।
रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते॥"
इति श्रीरामायणे उत्तरकाण्डे एकषष्ट्यादिसप्तत्यन्ताध्यायेभ्यः सङ्कलितम्॥ * ॥ लवणसमुद्रस्योत्पत्तिर्यथा,—
"विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम्।
सद्यो बभूव तत्रैव धन्या गर्भवती सती।
तस्थौ तत्र सुखासीना सार्द्धं पुत्त्रैश्च सप्तभिः॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्जने।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिके प्रियम्।
विललाप भृशं तत्र शृङ्गारातृप्तमानसा॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यति॥
कदापि ते जलं केचित् न खादिष्यन्ति जीविनः॥
शशाप सर्व्वान् बालांश्च यात मूढ़ा महीतलम्।
गच्छध्वं च महीं मूढ़ा जम्बुद्वीपं मनोहरम्॥
स्थितिर्नैकत्र युष्माकं भविष्यति पृथक् पृथक्।
द्वीपे द्वीपे स्थितिं कृत्वा तिष्ठन्तु सुखिनः सुताः॥
द्वीपस्थाभिर्नदीभिश्च सह क्रीड़न्तु निर्जने।
कनिष्ठो मातृशापाच्च लवणोदो बभूव ह॥
कनिष्ठः कथयामास मातृशापञ्च बालकान्।
आजग्मुर्दुःखिताः सर्व्वे मातृस्थानञ्च बालकाः॥
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम्।
प्रणम्य मातुश्चरणं भक्तिनम्रात्मकन्धराः॥
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्विभागशः।
कनिष्ठाद्दृष्टपर्य्यन्तं द्विगुणं द्विगुणं मुने॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः।
एतेषाञ्च जलं पृथ्व्यां प्रस्थापेच भविष्यति।
व्याप्ताः समुद्राः सर्व्वैव सप्तद्वीपां वसुन्धराम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३ अध्यायः॥